# Brahmatarkastavah

# બ્રહ્મતર્કસ્તવઃ

## Document Information

Text title : Brahmatarkastavah

File name : brahmatarkastavaH.itx

Category : shiva, appayya-dIkShita, dhyAnam

Location : doc_shiva

Author : Appayya Dixit

Transliterated by : Vani V

Proofread by : Vani V

Description/comments : The scan includes the commentary/vyAkhyA by the author himself.

Latest update : February 3, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# બ્રહ્મતર્કસ્તવઃ

॥ શ્રીઃ ॥

ઉચ્ચાવચૈરુપનિષદ્વચનપ્રકાણ્ડૈ-
    રુન્મીલિતશ્રુતિગણૈરુપબૃંહણૈશ્ચ ।
યત્સાદરં સમુદિતં યમિનામુપાસ્યં
    તદ્બ્રહ્મ શઙ્કરભવાનિતિ તર્કયામઃ ॥ ૧॥

યદ્બ્રહ્મલક્ષણતયા શ્રુતિસૂત્રસિદ્ધં
    તત્કારણત્વમનુમોદિતયા શિખાદ્યૈઃ ।
અત્યાશ્રમોપનિષદા હર ચોદિતાનિ
    ત્વય્યેવ કારણવચાંસિ સમર્પયન્તિ ॥ ૨॥

પુષ્પેષુશાસન પુરાણગિરોઽપ્યનલ્પા-
    સ્ત્વં બ્રહ્મ નેતર ઇતિ પ્રતિપાદયન્તિ ।
શબ્દાર્થયોરધિગતાદધિકૈકરૂપ્યા-
    ન્મૂલશ્રુતીરપિ શિવસ્વવશં નયન્ત્યઃ ॥ ૩॥

દ્વૈપાયનઃ સ ભગવાનિતિહાસરત્ને
    ધર્માત્મજે વિટપિરૂપકમાદધાનઃ ।
બ્રહ્મેતિ શઙ્કર ગિરા વ્યપદિશ્ય મૂલં
    ત્વં બ્રહ્મ શાશ્વતમિતિ પ્રકટીચકાર ॥ ૪॥

વિષ્ણુર્દ્વિજાશ્ચ વિષમાક્ષ પૃથગ્ગૃહીતા
    વેદસ્તપોઽપિ ચ ન ચેતનમધ્યયોગ્યમ્ ।
વાચ્યા ચ તત્સ્થિતિકૃતિ ક્વચિદસ્ય વૃત્તિ-
    ર્મૂલત્વરૂપણવશાદિતિ નિર્વિશઙ્કમ્ ॥ ૫॥

સાહ્યેન કૃષ્ણ ઇવ તસ્ય હિ રાજ્યસિદ્ધા -
    વાશીર્મુખેન મુખજા ઇવ ચ ત્વમીશ ।

મૂલં કપાલધર નિત્યમનુગ્રહેણ
    તન્મધ્યપાઠવિષયસ્તદસિ ત્વમેવ ॥ ૬॥

કૈરાતપર્વણિ તુરઙ્ગમમેધવૃત્તે
    કૈલાસશૈલગમને શતરુદ્રિયે ચ ।
સૌષુપ્તિકાદિષુ ચ શઙ્કર પાણ્ડવેષુ
    સાનુગ્રહત્વમધિકં હિ તવ પ્રસિદ્ધમ્ ॥ ૭॥

પ્રત્યક્ષમેવ ભવતા નિહતા કુરૂણાં
    સેના તતસ્તુ નિહતા મઘવત્સુતેન ।
યુક્તં કિમેતદતિશાયિ યુધિષ્ઠિરાર્થે
    મૂલં ત્વદન્યદિહ મુગ્ધમૃગાઙ્કમૌલે ॥ ૮॥

ઉક્તં મયૈવ નિહતા ઇતિ શૌરિણા ય-
    ત્તત્રૈવતો વિજય એવ પરં નિરાસ્યઃ ।
સાહ્યં સ શૌરિરપિ યસ્ય બલેન ચક્રે
    તેષાં મહેશ તવ તસ્ય કથં નિરાસઃ ॥ ૯॥

યદ્દેવ દર્શિતવતા હરિણા તથોક્તં
    તદ્વિશ્વરુપમપિ તાવકમેવ મન્યે ।
પાર્થાય નાથિતવતે પરરુપદૃષ્ટિં
    તેન ત્રિલોચન તદેવ હિ દર્શનીયમ્ ॥ ૧૦॥

યુક્તં તદેતદત એવ હિ મોક્ષધર્મે
    તેનાર્જુનં પ્રતિ નિજં વપુરાસ્થિતેન ।
દેવેન તેન નિહતાન્હતવાનસીતિ
    ત્વય્યેવ તદ્વચનપર્યવસાનમુક્તમ્ ॥ ૧૧॥

પ્રાગુક્તસર્વમહિમોપચિતં હિ તત્ર
    રૂપં પરં શિવ દિદૃક્ષિતમર્જુનેન ।
ગીતોદિતશ્ચ મહિમા સકલોઽપિ નાથ
    સ્પષ્ટં ત્વદીય ઇતિ કૌર્મગિરા પ્રતીમઃ ॥ ૧૨॥

ગીતાસુ યચ્છરણમીશ્વરમેવ કુર્વિ-
    ત્યુક્તં સુરેન્દ્રતનયં પ્રતિ માધવેન ।
ઉક્ત્વા કરિષ્ય ઇતિ તેન તવૈવ પૂજા
    યચ્ચ વ્યતન્યત તતોઽપિ તથા પ્રતીમઃ ॥ ૧૩॥

અઙ્ગુષ્ઠમાત્રમધિસૂત્રગણં પુમાંસં
    બ્રહ્મેતિ યચ્છુકગુરુઃ સ વિનિર્ણયાય ।
ઈશાન ઇત્યભિધયા ત્વયિ ક્લૃપ્તરૂઢ્યા
    ત્વાં બ્રહ્મ તેન ચ શિવ સ્ફુટયાઞ્ચકાર ॥ ૧૪॥

એવં પ્રમાણપરિપાટિકયા વિશાઙ્કું
    બ્રહ્મ ત્વમિત્યવધૃતેઽપિ જલન્ધરારે ।
આરોપિતૈસ્ત્વયિ પરં જનનાદિદોષૈ-
    સ્ત્વં બ્રહ્મ નેતિ વદતઃ પ્રતિબોધયામઃ ॥ ૧૫॥

કલ્પાદિષુ દ્રુહિણકેશવરુદ્રરૂપૈ-
    સ્ત્વત્તસ્ત્વમેવ ભગવન્પ્રવિભાગમાપ્તઃ ।
તૈરેવ તેષુ વિષમાક્ષ પરસ્પરસ્મા-
    દાવિર્ભવન્નનુકરોષિ જયૈષિવૃત્તિમ્ ॥ ૧૬॥

દેવ ત્વમેવ નિટિલાદ્યદિ ધાતૃવિષ્ણ્વો-
    રાવિર્બભૂવિથ તતસ્તવ કો નિકર્ષઃ ।
નાસાપુટાન્ન હિ વિધેર્ન ચ તસ્ય પૌત્રા-
    જ્જાતોઽસિ વિષ્ણુરિવ નાપિ મનુષ્યમાત્રાત્ ॥ ૧૭॥

નાસ્ત્યેવ તે પુરુષવીર્યકણાનુષક્તિ-
    ર્ન સ્ત્રૈણગર્ભવસતિર્ન ચ યોનિજત્વમ્ ।
વ્યક્ત્યા પરં ક્વચન તે શિવ યદ્યવદ્ય-
    મેતૈઃ કિયત્ખલુ વિભો ન ભવેન્મુરારેઃ ॥ ૧૮॥

અભ્યર્થનોપગમપૂર્વમકર્મવશ્ય-
    માવેદયદ્ભિરવતારમિમં સમસ્તમ્ ।
પૌરાણિકૈઃ પ્રકટિતા પરિહારરીતિ-
    ર્વિશ્વેશ હન્ત વિદિતાવિદિતા ખલાનામ્ ॥ ૧૯॥

કાલાગ્નિરુદ્રવપુષા ભગવન્ભવાર્તિ
    કલ્પાવસાનસમયેષુ હરઞ્જનાનામ્ ।
ગૃહ્ણાસિ શઙ્કર તમઃ કરુણૈકમૂર્તિઃ
    શસ્ત્રં નૃણાં વ્રણરુજં શમયન્નિવ ત્વમ્ ॥ ૨૦॥

નિદ્રાલુતા ન તવ શઙ્કર શક્યશઙ્કા

ક્રૌર્યં કિમપ્યનુચિતે વિષયે ન દૃષ્ટમ્ ।
નાન્યોઽપિ કશ્ચન ગુણસ્તમસો વિકારઃ
શઙ્કયા કથં તવ બુધૈસ્તમસાભિભૂતિઃ ॥ ૨૧॥

સત્ત્વપ્રવર્તનકરસ્ત્વમસિ પ્રતીતઃ
સત્ત્વં તનુશ્ચ તવ સત્ત્વમયશ્ચ યત્ત્વમ્ ।
એતાવદદ્રિતનયાધિપ સાત્ત્વિકત્વં
કિં સમ્ભવેત્ક્વચન તામસતાવિરોધિ ॥ ૨૨॥

ઉગ્રસ્ત્વમુત્તરતયા જગતઃ સમસ્તા-
દ્ભૂયાસમુગ્ર ઇતિ તત્પરતા હિ દૃષ્ટા ।
ભીમોઽસિ શઙ્કર નિયન્તૃતયાઽખિલાનાં
વેદઃ પ્રણૌતિ યત એવ મહદ્ભયં ત્વામ્ ॥ ૨૩॥

સઙ્ખ્યાતિશાયિગુણ સત્ત્વનિધિસ્ત્વમેવ
જ્ઞાનં સુખં ચ યદિ સત્ત્વગુણાદવાપ્યમ્ ।
જાનીમહે તદુભયં ત્વદધીનમીશ
જાબાલસૂનૃતમુખૈર્નનુ જન્મભાજામ્ ॥ ૨૪॥

વિદ્યાપ્રદં વરદ વિશ્વસિમઃ કમન્યં
વિદ્યાધિપે ભવતિ વિશ્વગુરૌ પ્રતીતે ।
સર્વજ્ઞનામનિ સમુન્મિષદિન્દુચૂડે
સવ્યાર્ધવિગ્રહસમાકલિતાત્મવિદ્યે ॥ ૨૫॥

શમ્ભુઃ શ્રુતોઽસિ નનુ તૃપ્તિવિરાગશાલી
વૈરાગ્યચિહ્નભરિતશ્ચ મહેશ્વરસ્ત્વમ્ ।
તં ત્વામપારસુખસાગરમન્તરેણ
કસ્માત્સુખં ભવિતુમર્હતિ દેહભાજામ્ ॥ ૨૬॥

યજ્જીવરત્નમખિલાગમલાલનીયં
યે ચ ત્રિનેત્ર મૃડશઙ્કરનામધેયે ।
એતૈરપિ સ્ફુટમનન્યસમાશ્રયં તે
વિખ્યાપ્યતે સકલજીવસુખપ્રદત્વમ્ ॥ ૨૭॥

યત્પાશુપત્યમવૃણોરિતિ નિત્યવાણી
શંસત્યવૈમિ તત એવ તદીશ નિત્યમ્ ।
નિત્યં યદિષ્ટહવિરાદિવિધિસ્તવાય

તસ્યૈવ કલ્પયતિ સા હિ વરેણ લાભમ્ ॥ ૨૮॥

શક્નોતિ નૈવ પશુપાશપતીન્વિવેક્તું
મુક્તઃ કથં ભવતિ મોહિત એષ લોકઃ ।
ઇત્યાકલય્ય ભગવન્યદિ વા વરેણ
સ્પષ્ટીચકર્થ તદિદં કિમુ દૂષણાય ॥ ૨૯॥

કિં તેઽથ વા વરવૃતેઃ ફલચિન્તનેન
લીલૈવ શૂલધર સન્તતમીદૃશી તે ।
ઉદ્દિશ્ય કિં ફલમવાપ્તસમસ્તકામઃ
શશ્વત્સૃજસ્યવસિ સંહરસિ પ્રપઞ્ચમ્ ॥ ૩૦॥

આગન્તુકં યદિ ભવેત્તવ પાશુપત્ય-
મર્થોઽપિ નિસ્તરતિ નાનુપપત્તિસીમામ્ ।
સંસારિણો હિ સકલાઃ પશવો નિરુક્તાઃ
સ્યાદાદિમત્કથમધીશ્વર તત્પતિત્વમ્ ॥ ૩૧॥

આસ્તાં પતિત્વમદસીયમિદં પશુત્વં
નાર્હત્યધીશ કથમપ્યધુનાતનત્વમ્ ।
યદ્યસ્તિ તસ્ય વરણશ્રવણેષુ કાચિ-
ન્નિર્વાહરીતિરપરા ન કિમત્ર સા સ્યાત્ ॥ ૩૨॥

માયાદિપાશદૃઢબન્ધવિમોહિતાનાં
યત્સ્વામિકર્મકરણં યજનાદિરૂપમ્ ।
ગૌણં પશુત્વમિદમેવ હિ દેહભાજા-
મેતચ્ચરાચરપતે કથમાદિમત્સ્યાત્ ॥ ૩૩॥

ત્વામામનન્તિ પરમીશ્વરમીશ્વરાણાં
ત્વાં દૈવતં ચ પરમં ખલુ દૈવતાનામ્ ।
ત્વામેવ નાથ પરમં ચ પતિં પતીનાં
કસ્માદૃતં વરદ વિશ્વસિમો વરં તે ॥ ૩૪॥

ગઙ્ગા ધૃતા ન ભવતા શિવ પાવનીતિ
નાસ્વાદિતો મધુર ઇત્યપિ કાલકૂટઃ ।
સંરક્ષણાય જગતાં કરુણાતિરેકા-
ત્કર્મદ્વયં કલિતમેતદનન્યસાધ્યમ્ ॥ ૩૫॥

ગઙ્ગાપિ નૈવ ભવતા કરિચર્મધારિ કરિચર્મધારિ-
 ન્મૂર્ધ્ના ધૃતા મધુરિપોશ્ચરણાત્ક્ષરન્તી ।
કિં તુ પ્રસાદનપરાય ભગીરથાય
 દત્ત્વા વરં શતધૃતેઃ સદનાત્પતન્તી ॥ ૩૬॥

સાપિ ત્વદઙ્ગપતિતા નિતરાં પવિત્રા
 જાતા તતસ્ત્વદભિષેકજલોપમેતિ ।
સ્વર્લોકવાસિભિરનન્તરમાદૃતાસી-
 દ્યે મૂર્ધભિર્દધાતિ તે ચરણાવસૃષ્ટમ્ ॥ ૩૭॥

ઉજ્જૃમ્ભણે યદુકુલાધિપતેરુદાસ્થા
 બાલેન્દુશેખર પુરા કિલ બાણયુદ્ધે ।
એતાવતા વિકલતાં તવ વિક્રમસ્ય
 લોકે ખલાઃ કતિચિદીશ્વર કલ્પયન્તિ ॥ ૩૮॥

ઓજીયસામસિ વરઃ સ્થિરકાર્મુકોઽસિ
 ભીમોઽસિ સર્વજગતામખિલેશ્વરોઽસિ ।
ઇત્થં ત્વયિ શ્રુતિશતૈઃ પરિગીયમાણે
 કિં નામ જલ્પતિ જનઃ શિવ કિમ્પચાનઃ ॥ ૩૯॥

કલ્પાન્તરદ્રુહિણકોટિકરોટિમાલા-
 ભસ્માઙ્ગરાગકમઠાઙ્ગવરાહશ‍ૃઙ્ગૈઃ ।
આકલ્પ એવ તવ મઙ્ગલવિગ્રહસ્ય
 સર્વોત્તરં તવ બલં કિમુ ન વ્યનક્તિ ॥ ૪૦॥

યસ્યાંશકૈઃ શરભભૈરવવીરભદ્રૈ-
 રામર્દિતા હરિવિરિઞ્ચપુરન્દરાદ્યાઃ ।
વિશ્વેશ તસ્ય તવ વિક્રમભૂરિભાવે
 સાક્ષ્યં ત એવ સમુપાદદતે કિમન્યૈઃ ॥ ૪૧॥

કલ્પદ્રુમાહરણષટ્પુરશાસનાદિ
 યદ્દત્તયૈવ યદુરાડતનિષ્ટ શક્ત્યા ।
તસ્મિઞ્શિવ પ્રતિહતિં તવ પૌરુષસ્ય
 મૂર્ખોદિતાં બત સ એવ કથં સહેત ॥ ૪૨॥

શપ્તસ્ત્વયા શતમખસ્ય રિપુઃ સ યુદ્ધ-
 મભ્યર્થયન્નસુરભાવવિલોપનાય ।

મત્તુલ્ય એવ સમરે મદમસ્ય દોષ્ણાં
    કણ્ડૂભરોત્થમચિરાદપનેષ્યતીતિ ॥ ૪૩॥

દેવ્યા ચ દેવ વચનં તવ નિર્વહન્ત્યા
    સમ્પાદિતા સમરસમ્પદુષાનિદાના ।
યત્ર ત્વયા હરિમુખેણ ભુજાવલેપા-
    ત્પ્રચ્યાવ્ય સૈષ નિહિતઃ પ્રમથાધિપત્યે ॥ ૪૪॥

શૈલી ચ તે સમુદિતા શશિખણ્ડચૂડ
    ભક્તે વિભાવયસિ યદ્ભવતોઽધિકત્વમ્ ।
આદાય ચક્રમભિદિવ્યનદીતનૂજં
    યામેવ સોઽપ્યનુસસાર યદુપ્રવીરઃ ॥ ૪૫॥

દત્તં ચ શૌર્યમધિકં ભવતૈવ તસ્મૈ
    તચ્ચેન્મહેશ કલયાપિ ન પાલયેથાઃ ।
આશઙ્ક્ય વાક્યમખિલં ભવતો મૃષેતિ
    વેદાગમેષ્વપિ જના વિમુખા ભવેયુઃ ॥ ૪૬॥

એતૈસ્ત્વયા ગિરિશ હેતુભિરેવ તસ્મિ-
    ન્નાવિષ્કૃતં કિમપિ તત્સહજં ન તેજઃ ।
કામાન્ધકત્રિપુરવાસિજલન્ધરાદ્યૈ-
    ર્યસ્મિન્દરપ્રકટિતે શલભત્વમાપ્તમ્ ॥ ૪૭॥

દગ્ધે તવાક્ષિદહનેન ચરાચરેઽસ્મિ-
    ન્મત્વાખિલં ભુવનમેવ મહાશ્મશાનમ્ ।
તત્ર સ્થિતિં વિબુધનાથ તવાસહાયાં
    સન્તઃ શ્મશાનવસતિં સમુદાહરન્તિ ॥ ૪૮॥

સન્ધ્યાસુ ભૂતગણભૈરવભદ્રકાલી-
    સંરમ્ભજન્મજગદાપદપાસનાય ।
તદ્ગોચરેષુ પિતૃકાનનભૂમિષુ ત્વં
    તત્તાદૃશં ગિરિશ તાણ્ડવમાતનોષિ ॥ ૪૯॥

શ્રીકણ્ઠ તાવકચરિત્રરહસ્યરીતિ-
    મેતાદૃશીં ક ઇવ વેત્તિ નરઃ સુરો વા ।
ત્વન્નામરૂપગુણચિન્તનપુણ્યમેવ
    વ્યાજેન કેનચિદવાપ્તુમિહ શ્રમો મે ॥ ૫૦॥

શશ્વચ્ચેતો મમ પશુપતે શાલ્મલીપુષ્પતુલ્યા-
    નન્યાન્દેવાનતિલઘુફલપ્રાપકાન્વર્જયિત્વા ।
પદામ્ભોજે તવ પરિમિલદ્દિવ્યભૃઙ્ગાવલીઢે
    ચન્દ્રાપીડ શ્રયતુ સતતં ચઞ્ચરીકસ્ય લીલામ્ ॥

બ્રહ્મોપેન્દ્રપ્રમુખવિનુત બ્રહ્મતર્કસ્તવોઽયં
    ભક્તિગ્રાહ્યસ્તવમિતિ ભગવન્નિર્મિતો ભક્તિમાત્રાત્ ।
પાદદ્વન્દ્વે તવ કરુણયા નિર્ગુણોઽપિ ત્વદીયે
    પૂજાપુષ્પપ્રકરપદવીમેષ પુષ્ણાતુ નિત્યમ્ ॥

ઇતિ શ્રીમદ્ભારદ્વાજકુલજલધિકૌસ્તુભશ્રીમદદ્વૈતવિદ્યાચાર્ય-
શ્રીવિશ્વજિદ્યાજિશ્રીરઙ્ગરાજાધ્વરિવરસૂનુના શ્રીમદપ્પય દીક્ષિતેન
કૃતો બ્રહ્મતર્કસ્તવઃ સમ્પૂર્ણઃ ॥

Encoded and proofread by Vani V

*Brahmatarkastavah*
pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*